## अध्याय :- ५१ Chapter-51

अतिथिरुवाच ।।
यदेतत्परलोकस्य स्वरूपं व्यादतं त्वया ।।
आगमं समुपाश्रित्य तत्तथैव न संशयः ।। १

किंत्वत्र नास्तिकाः पापाः सन्दिग्ध्यन्ते ऽल्प चेतनाः ।।
तेषां निःसंशयकृते वद कर्मफलं हि यत्[1] ।। २

इहैव कस्य कस्यैव कर्मणः पापकस्य च ।।
प्रभावात्कीदशो जायेत्कमठ तद्वदास्ति चेत् ।। ३

कमठ उवाच[2] ।।
सर्वमेतत्प्रवक्ष्यामि स्थिरो भुत्वा श्रृणुष्व तत् ।।
यथा मम गुरुः प्राह यन्मे चेतसि संस्थितम् ।। ४

बहूमहा क्षयरोगी[3] स्यात्सुरापः श्यावदंतकः ।।
सुवर्ण चौरः कुनखी दुश्चर्मा गुरुतल्पगः ।। ५

संसर्गी सर्वरोगी स्यात्पंच पातकिनस्त्वमी ।।
निंदामाकर्ण्य साधूनां बधिरः संप्रजायते ।। ६

स्वयं प्रकीर्तयेच्चापि मूकः पापी ऽभिजायते ।।
आज्ञालोपी गुरूणां च अपस्मारी भवेन्नरः ।। ७

---

१ अ. तत्
२ अ. प्रतौ 'उवाच' नास्ति ।
३ ब. क्षयहारि

अवज्ञा कारक[1] स्तेषां कृमिरेवाभिजायते ।।
उपेक्षतः[2] पूज्यकार्यं दुष्प्रज्ञत्वं च जायते[3] ।। ८

चौर्याय[4] साधु द्रव्याणां दद्याद्यात्पदा नि च ।।
तावद्वर्षाणि पंगुत्वं स प्राप्नोति नराधमः ।। ९

दत्वा हरति तद्भूयो जायते कृकलासकः ।।
कुपितान प्रसाद्यैव पूज्यान्स्याच्छीर्ण रोगवान् ।। १०

रजस्वलामभिगच्छंश्च चंडालः संप्रजायते ।।
वस्त्रापहारी चित्रीस्यात्कृष्ण कुण्ठी तथाग्निदः ।। ११

दर्दुरी रूपयहारी स्यात्कूटसाक्षी मुखारूजः ।।
परदारांश्च कामिन द्रष्टा स्यादक्षिरोगवान् ।। १२

प्रतिज्ञायाप्रयच्छन्यो ह्यल्पायुर्जायते नरः ।।
~~विप्रज्ञायाप्रयच्छन्यो~~ विप्रवृत्त्यपहारी स्यादजीर्णी[5] सर्वदाधमः ।। १३

नैष्ठिकान्ना[6]शनाद्भूयो निवृतो रोगवान्सदा ।।
पत्नीबहुत्वे त्वेकस्यां रेतोमोक्षः क्षयी भवेत् ।। १४

---

१ अ. हारक
२ अ. अपेक्षते । ब. उपेक्ष्यतः ।
३ ब. प्रजायते
४ ब. ब चौयार्थि
५ अ. जीर्णः
६ अ. नेष्टि

स्वामिना धर्मयुक्तो यस्त्वन्यायेन समाचरेत् ।।
स्वयं वा भक्षयेद्द्रव्यं स मूढः स्याज्जलोदरी ।। १५

दुर्बलं पीडयमानं यो बलवान्समुपेक्षते ।।
अंगहीनः स च भवेदन्नत्दत्क्षुधितो भवेत् ।। १६

व्यवहारे पक्षपाती जिह्वारोगी भवेन्नरः ।।
धर्म प्रवृत्तिं संजाय[1] पत्न्यादीष्ट वियोगकृत्[2] ।। १७

स्वयंपाकाग्र भोजी यो गलरोगम वाप्नुयात् ।।
पंचयज्ञान कृत्वैव [3]भुज्जानो ग्रामशूकरः ।। १८

पर्वमिथुन कृन्मेही परित्यज्य स्वगेहिनीम् ।।
वेश्यादिस्तको मूढात्मा खलवाटो जायते नरः ।। १९

परिक्षीणान्मित्र बन्धुन्स्वामिनं दयितानुगान् ।।
अवमन्य निवृत्तात्मा क्लिष्टवृत्तिः सदा भवेत् ।। २०

छद्मनो पचरेद्यस्तु पितरौ स्वामिनं गुरुन्[4] ।।
[5]प्राप्तव्यार्थ स्याति कष्टात्परिभ्रंशार्थजो भवेत् ।। २१

---

१ ब. संवार्य
२ अ. ब. वान्
३ अ. भुंजन्स्या ग्रामश्रुकरः ।।
४ ब. गुरुः
५ अ. प्राप्त प्राप्त स्याति इति स्यात् ।

विश्ववधं स्यापहारी तु दुःखानां भाजनं भवेत् ।।
धार्मिके शुद्रकारी यो नरः स वामनो भवेत् ।। २२

दुर्बलवृषवाही यः कटिलूकी भवेत्स च ।। २३

जात्यंधश्चापि यो गोघ्नो निः पशुर्दुःखकृद्भवाम् ।।
निर्दयो घातकः सदा सोध्वसु कष्टगः ।। २४

निस्तेजकः सभार्या यो गलगण्डी सजायते ।।
सदा क्रोधी च चंडालः पूतिवक्त्रश्च सूचकः ।। २५

अजविक्रय कृद्धयाद्यः कुण्डाशी भृतको भवेत् ।।
नास्तिकस्तिल पिडी[1] स्यादश्रद्धो गीत जीवनः[2] ।। २६

अभक्ष्यादो[3] गण्डमाली स्त्री खादी चा/सुतस्य कृत् ।।
अन्यायतो[4] ज्ञानग्राही मूर्खो भवति मानवः ।। २७

[5]शास्त्र चौरः केकराक्षः कथां पुण्यां च द्वेष्टि यः ।।
कृमिवक्त्रः स च भवेद्विभ्रष्टो नरकात्कुधी ।। २८

---

१ ब. पिंड
२ ब. जीविनः
३ ब. अभिक्षादो
४ ब. अज्ञायतो
५ 'शास्त्रचौरः' अ. प्रतौ न पठयते

देवद्विजगवां वृत्तिहारको वांत भक्षकृत् ।।
तडागाराम भेत्ता यो भवेद्विकलपाणिकः ।। २९

व्यवहारेच्छलग्राही भृत्यग्रस्तो भवेन्नरः ।।
सदा पुरुषरोगी स्यात्परदाररतो नरः ।। ३०

वातरोगी कुवैद्यः स्यादुश्चर्मा गुरुतल्पगः ।।
मधुमेही खरीगामी मैत्र स्त्री मैथुनोऽप्रसूः ।। ३१

स्वसारं मातरं पुत्रवधूं गच्छन्न बीजवान् ।।
कृतघ्नः सर्व कार्याणां वैफल्यं [1]समुपाश्नुते ।। ३२

इत्येष लक्षणो देशः पापिनां परिकीर्तितः ।।
चित्रगुप्तोऽपि मुह्येत सकलस्यानु वर्णने ।। ३३

एते नरक विभ्रष्टा भुक्त्वा योनीः सहस्त्रशः ।।
एवं विधैश्चिह्नितांश्च जायंते लक्षणैर्नराः ।। ३४

ये हि धर्मं न मन्यंते तथा ये [2]व्यसनेऽर्जिताः ।।
अनुमानेन बोद्धव्यं वदेते शेषपापिनः ।। ३५

---

१ अ. सम
२ ब. दानवर्जिताः ।।

येषां तुवृंतगतं पापं स्वर्गाद्वा ये समागताः ।।
सर्व‿व्यसन निर्मुक्ता धर्ममेकं भजन्ति ते ।। ३६

भवंति‿चात्र श्लोकाः ।।
धर्मादनवमं सौख्यमधर्माद्दुःख सम्भवः ।।
तस्माद्धर्मं सुखार्थाय कुर्यात्पापं विवर्जयेत् ।। ३७

लोक‿द्वयेऽपि यत्सौख्यं तद्धर्मात्प्रोच्यतेयतः ।।
धर्म‿मेक‿मतः कुर्यात्सर्व कार्यार्थ सिद्धये ।। ३८

~~मुहूर्तमपि जीवेत लोकद्वय विरोधिनि ।।~~
मुहूर्तमपि जीवेत नरः शुक्लेन कर्मणा ।।
न कल्पमपि जीवेत लोकद्वय विरोधिना ।। ३९

इति पृष्टं त्वया विप्र यथाशक्त्या मये रितम् ।।
असूक्तं सूक्तमथवा श्रोतव्यं किं वदामि च[1] ।। ४०

नारद उवाच ।।[2]
कमठ‿स्यैतदाकर्ण्य अष्टवर्षस्य भाषितम् ।।
भगवान्भास्करः प्रीतो बभूवातीव विस्मितः ।। ४१

अहो प्रजापतिर्धन्यो यन्मर्यादा भिवाल्पते ।।
अमीभिर्ब्राह्मण‿वरै‿र्धन्या वेदाश्चैव संप्रति ।। ४२

---

१ अ॰ प्रती 'वा'

२ अ॰ श्री नारद ।। ब॰ श्री नारद उ॰ ।।

अहो वसुमती धन्या द्विजैरेवंविधोत्तमै ।। ४३

येषां मध्ये बालवुद्धिरियमेतादशी स्फुटा ।।
हारीतप्रमुखानां हि का वै[१] बुद्धिर्भविष्यति[२] ।। ४४

असंशयं त्रिलोकस्थमेषाम विविदं न हि ।।
यथैतान्नारदः प्राह भूयस्तस्मादमी बहु ।। ४५

इति प्रशस्य तान्विप्रान्प्रहृष्टो रविरब्रवीत् ।।
अहं ~~श्री~~ सूर्यो विप्रमुख्या युष्माकं दर्शनात्कृते ।। ४६

समागतः सूर्यलोकात्प्राप्तं नेत्रफलं च मे ।।
~~भवि~~ भवद्भिः र्विप्रमुख्यैः संजल्पन सहासनात् ।। ४७

अंत्यजा अपि पूयन्ते किं पुनर्मादृशा द्विजाः ।।
सर्वथा नारदो धन्यो यो/सौ त्रैलोक्यतत्त्ववित् ।। ४८

प्रणमामि च वः सर्वान्मनो बुद्धि समाधिभिः ।।
तपो विद्या च वृत्तं च यतो वार्द्धक्य कारणम् ।। ४९

---

१ अ. रै
२ ब. ते

वरं मत्तो वृणीध्वं च दुर्लभं यं त्वदीच्छत ॥
यूयं स्वयं हि वरदा मत्संगोमास्तु निष्फलः ॥ ५०

देवतानां हि संसर्गो निष्फलो नोपजायते ॥
तस्मान्मत्तो वरं किंचिद्वृणुध्वं प्रददामि वः ॥ ५१

श्री नारद उवाच ॥[२]
इति सूर्यवचः श्रुत्वा प्रहृष्टास्ते द्विजोत्तमाः ॥ ५२

संपूज्य परया भक्त्या पाद्यार्घ्य स्तुति वंदनैः ॥
मंडलादीन्महाजप्यान्गुणंतः प्रोचिरे रविम् ॥ ५३

जयादित्य जय स्वामिंजय भानो जयामला[३] ॥
जय वेदपते शश्वत्तारयास्मान हर्षते ॥ ५४

विप्राणां त्वं परो देवो विप्रसर्गोऽपि त्वन्मयः ॥
नितरां[४] पूतमेतन्नः स्थानं देव त्वयेक्षितम् ॥ ५५

अद्य नः सफला वेदा अद्य नः सफलाः[५] क्रियाः ॥
अद्य नः सफलं गेहं त्वया संगम्य गोपते ॥ ५६

---

१ अ॰ प्रव...
२ अ॰ प्रतौ इत्ययं पाठः नास्ति । ब॰ श्री नारद उ॰ ॥
३ ब॰ जायामल
४ अ॰ नितरं
५ ब॰ सफलाः

वरं यदि प्रदातासि तदेनं प्रवृणीमहे ।।
आस्माकीनमिदं स्थानं न हि त्याज्यं कथंचन ।। ५७

श्री सूर्य उवाच[१] ।।
यस्माद्भवद्भिः पूर्वं हि जयादित्येति चोदितम् ।।
जयादित्य इति स्यात्तस्मात्स्थास्येऽत्र सर्वदा ।। ५८

यावन्मही समुद्राश्च पर्वता नगराणि च ।।
तावत्स्थानमिदं विप्रा न हि त्यक्ष्यामिकर्हिचित् ।। ५९

दारिद्र्यरोग[२] संधातान्दद्रवो मंडलानि च ।।
कुष्ठादीन्नाशयिष्यामि भजतामत्र संस्थितः ।। ६०

यो मामत्र स्थितं चापि पूजयिष्यति मानवः ।।
सूर्यलोकमिवागम्य पूजां तस्य भजाम्यहम् ।। ६१

श्री नारद उवाच ।।[३]
एवमुक्ते भगवता हारीताद्या द्विजोत्तमाः ।।
मूर्तिं संस्थापयामासुर्वेदोदित विधानतः ।। ६२

ततो द्विजाः प्राहुरेवं कमठं त्वत्कृते रविः[४] ।।
अत्र स्वामी स्थितस्तस्मात्प्रथमं स्तुहि त्वं रविम् ।। ६३

---

१ अ. प्रतौ 'उवाच' नास्ति ।
२ अ. दारिद्रं
३ अ. प्रतौ इत्ययं पाठः नास्ति । ब. नारद० ।।
४ ब. प्रतौ 'भारति' इति स्यात् ।

इत्युक्तो ब्राह्मणैः सर्वैः कमठो वाग्मिनांवरः ।।
प्रणिपत्य जयादित्यं महास्तोत्रमिदं जगौ ।।७ ६४

न त्वं कृतः केवलसंश्रुतश्रवे युजुष्येवं व्याहरत्यादि देव ।।
चतुर्विधा भारती दूरदूरं धृष्टः स्तौमि स्वार्थकामः क्षमैतत् ।। ६५

मार्तंडसूर्यौ शुर विस्तयेन्द्रौ भानुर्मगश्चार्यमा स्वर्णरिताः ।।
दिवाकरो मित्र विष्णुश्च देव ख्यातस्त्वं वै द्वादशशात्मा नमस्ते।। ६६

लोकत्रयं वै तव गर्भगेहं जलाधारः प्रोच्यसे खं समग्रम्[1] ।। ६७

नक्षत्रमाला कुसुमाभिमाला तस्मै नमो व्योम लिंगाक्तुभ्यम् ।। ६८

त्वं नेत्रनेत्रं घनबुद्धिबुद्धिसकाश काशी जय जीवः ।। ६९

रोगप्ररोगः प्रथितः[2] पृथिव्यां चिरं जयादित्य जयाप्रमेय[3] ।।७ ७०

---

१ अ. समग्रः
२ अ. प्रततः
३ अ. जयः प्रमेय ।।

व्याधिग्रस्तं कृष्ठरोगाभिभुतं ~~भ्रम~~ भग्नप्राणं क्षीणदेहं विसंज्ञम् ।। ७१

त्वं मे पिता त्वं जननी त्वमेव त्वं मे गुरुर्बान्धवाश्च त्वमेव ।।
त्वं मे धर्मस्त्वं च मे मोक्षमार्गो दासस्तुभ्यं त्यज वा रक्ष देव ।। ७२

पापोऽस्मि मूढोऽस्मि महोग्रकर्मा रौद्रोस्मि नाचार निधानमस्मि।।
तथापि तुभ्यं प्रणिपत्य पादयोर्वयं भक्तानामर्पय श्री जयार्क[१] ।। ७३

श्री नारद उवाच ।।
एवं स्तुतो जयादित्यः[२] कमठेन महात्मने ।। ७४

जयादित्याष्टकमिदं यत्त्वया परिकीर्तितम् ।।
अनेन स्तोष्यते यो मां भुवि तस्य न दुर्लभम् ।। ७५

~~मनेन स्तोष्यते~~
रविवारे विशेषेण मां समभ्यर्च्य यः पठेत् ।।
तस्य रोगा न शिष्यंति दारिद्रं च न संशयः ।। ७६

त्वया च तोषितो वत्स तवददभि वरं त्वमम् ।। ७७

---

१ अ. ब. जयार्कः
२ ब. य

त्वत्पिता स्मृतिकारश्च भविष्यति द्विजार्चितः ।।
स्थानस्यास्य न नाशश्च कदाचित्प्रभविष्यति ।। ७८

न च चैतत्स्थानकं वत्स परित्यक्ष्यामि कर्हिचित् ।।
एवमुक्त्वा स भगवान्ब्राह्मणैरर्चितः स्तुतः ।। ७९

अनुज्ञाप्य द्विजेंद्रांस्तां स्तत्रैवांतदधे प्रभुः ।।
एवं प्रार्थ समुत्पन्नो जयादित्यो ऽत्र भूतले ।। ८०

आश्विने[१] मासि संप्राप्ते रविवारे च सुव्रत[२] ।।
आश्विने[३] भानुवारेण यो जयादित्यमर्चयेत् ।। ८१

कोटितीर्थे नरः[४] स्नात्वा ब्रह्महत्यां व्यपोहति ।।
पूजनाद्रक्त माल्यैश्च रक्तचंदन कुंकुमैः ।। ८२

लेपनाद्गंध धूपाद्यै नैवेद्यघृत पायसैः ।। ८३

मुच्यते सर्वपापेभ्यः सूर्यलोकं च गच्छति ।।
पुत्रदारधनान्यायुः प्राप्य सांसारिकं सुखम् ।। ८४

---

१ अ, ब, 'अश्विने'

२ अ, 'तः'

३ अ, ब, 'अश्विने'

४ ब, नर

इष्टकामैः समायुक्तः सूर्यलोके चिरंवसेत् ।। ८५

सर्वेषु रविवारेषु जयादित्यस्य दर्शनम् ।।
कीर्तनं स्मरणं वापि सर्व रोगोप शांतिदम् ।। ८६

अनादिनिधनं देवमव्यक्तं तेजसां नि धिम् ।।
ये भक्तास्ते च लीयंते सौरस्थाने निरामये ।। ८७

सूर्योपरागे[१] संप्राप्ते रविकूपे समाहितः ।।
स्नानं यः कुरुते पार्थ होमं कुर्यान्प्रयत्नतः ।। ८८

दानं चैव यथाशक्त्या जयादित्याग्रतः स्थितः ।।
तस्य पुण्यस्य माहात्म्यं शृणुष्वैकमना जय ।। ८९

कुरुक्षेत्रेषु[२] यत्पुण्यं प्रभासे पुष्करेषु च ।।
वाराणस्यां च यत्पुण्यं प्रयागे नैमिषेऽपि वा ।। ९०

*३ इति श्री स्कांदे.... जयादित्य माहात्म्य वर्णनं नामैक –
– पंचाशतमोऽध्यायः ।।५१ ।।

---

१ अ. परागे

२ ब. च

*३ अ. इति श्री स्कंद पुराणे कुमारिकाखंडे जयादित्य माहात्म्यं ।।
ब. इति श्री स्कंद पुराणे कुमारिकाखंडे जयादित्य माहात्म्ये
एकपंचाशोऽध्यायः ।।